# संस्कृत-वार्ताः

**दिनांकः 04-04-2018**

**प्रातः 06:55**

**प्रवाचकोऽनुवादकश्च - परमानन्द-झाः**

**टंकण-सहायकः - संजय-त्रिपाठी**

**इयम् आकाशवाणी**

**सम्प्रति वार्ताः श्रूयन्ताम्**

**प्रवाचकः - परमानन्द-झाः**

## मुख्य-वार्ताः

- मुख्यो निर्वाचनायुक्तः ओम्प्रकाश-रावतः दिवस-त्रयात्मिकायाम् आधिकारिक-यात्रायाम् अद्य कर्णाटकम् प्रयाति।
- उत्तराखण्डोच्च-न्यायालयेन राज्य-प्रशासनमादिष्टं यत्तद् राज्यस्य एलौपैथी-चिकित्सकैस्तुल्यमेव वेतनम् आयुर्वेद-चिकित्सकेभ्योऽपि प्रदद्यात्।
- **अपि च,**

- अष्टाधिक-द्वि-सहस्र-तम-वर्षीयाः राष्ट्र-मण्डलीय-क्रीडाः अद्य ऑस्ट्रेलियायां गोल्ड-कोस्ट-क्रीडा-परिसरे प्रारभते।

--------------------

**कर्णाटकः-निर्वाचनायुक्ताः**

मुख्यो निर्वाचनायुक्तः ओम्प्रकाश-रावतः दिवस-त्रयात्मिकायाम् आधिकारिक-यात्रायाम् अद्य कर्णाटकम् प्रयाति। निर्वाचनोपायुक्तौ सुनीलअरोड़ा-अशोकलवासा-वर्यौ अपि यात्रायामेतस्यां तेन सहकृतौ स्तः। तत्र राज्ये विधानसभायै भावि-निर्वाचनमभिलक्ष्य निर्वाचनाधिकारिणां वृन्दमिदं विविधेषु स्तरेषु मन्त्रणाः समनुष्ठास्यति।

----

**उच्चन्यायालयः-आयुष्**

उत्तराखण्डोच्च-न्यायालयेन राज्य-प्रशासनमादिष्टं यत्तद् राज्यस्य एलौपैथी-चिकित्सकैस्तुल्यमेव वेतनम् आयुर्वेद-चिकित्सकेभ्योऽपि प्रदद्यात्। ततः पूर्वम् आयुर्वेद-विदां परिसंघेन न्यायालयः संसूचित आसीत् प्रशासनम् आयुष्-चिकित्साऽभियानाऽन्तर्गतम् एलोपैथी-चिकित्सकेभ्यः अष्ट-चत्वारिंशत्सहस्रम्, आयुर्वेद-चिकित्सकेभ्यश्च केवलम् अष्टाविंशति-सहस्रं रुप्यकाणि प्रददाति।

----

**सीतारमणः-रूसः**

प्रतिरक्षा-मन्त्री निर्मला-सीतारमणः गतदिने मॉस्को-नगरे रूसस्य रक्षामन्त्रिणं जनरल्-सर्जीशोइगुं मेलितवती। उभौ नेतारौ देश-द्वय-मध्ये प्रतिरक्षा-क्षेत्रीयं सहयोगं विशिष्य सैन्यप्रविधि-सहयोगम् अधिकृत्य चर्चामाचरितवन्तौ। अत्रेयं ध्यानास्पदं विद्यते यत् श्रीमती सीता-रमणः सम्प्रति अन्ताराष्ट्रिय-सुरक्षासम्मेलने भागं ग्रहीतुं रूसस्य दिवस-त्रयात्मिकायाम् आधिकारिक-यात्रायां मॉस्को-नगरं संप्राप्ताऽस्ति।

**स्वराजः-अज़र्बेजानम्**

विदेश-मन्त्री सुषमा-स्वराजः व्यूह-निरपेक्षान्दोलनस्य मध्यावधिके मन्त्रि-संमेलने भागमादातुम् अद्य अज़र्बेजानं प्रति प्रतिष्ठते। देशस्यास्य दिवस-त्रयात्मके यात्रावधौ श्रीमती स्वराजः तत्रत्यं सम-कक्षं, राष्ट्रपतिम्, उपराष्ट्रपतिम् चापि मेलिष्यति।

----

**राष्ट्रमण्डलीयक्रीडाः**

अष्टाधिक-द्वि-सहस्र-तम-वर्षीयाः राष्ट्र-मण्डलीय-क्रीडाः अद्य ऑस्ट्रेलियायां गोल्ड-कोस्ट-क्रीडा-परिसरे प्रारभते। भारतीय-समयाऽनुसारम् अद्यापराह्णिके सार्ध-त्रि-वादने आसां क्रीडानाम् औपचारिकमुद्घाटनं भविष्यति, यत्र भारतीया बैडमिण्टन्-तारका पी.वी.सिन्धुः अष्टाशाधिक-द्विशत-सदस्यात्मकस्य भारतीय-विशाल-क्रीडक-वृन्दस्य नेतृत्वमुद्वहन्ती राष्ट्रियं त्रिरङ्ग-ध्वजं सम्भालयिष्यति। एकादश-दिवस-व्यापिनि एतस्मिन्

क्रीडा-महाकुम्भे जगतः एक-सप्ततिः राष्ट्र-मण्डल-देशाः अष्टादशसु क्रीडासु पृथग्विधाः प्रतिस्पर्धाः संमुखीकरिष्यन्ति। विगतासु ग्लास्गो-राष्ट्रमण्डल-क्रीडासु भारतेन चतुर्थं स्थानमलंकृतमासीत्।

-----

**।। इति वार्ताः ।।**